# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

पत्रसंख्या : V

पाठ्यांशनाम : स्थानिवदादेशोऽनल्विधौ - 2

पाठ्यांशसंख्या : 5

पाठ्यांशस्य मुख्याः अंशाः :

1) स्थानिवत्सूत्रेण अप्रधानकार्यमतिदिश्यते।
2) अनुमानिकस्थान्यादेशभावेऽपि प्रवृत्तिः।
3) एकदेशविकृतमनन्यवद्।

विषयसूची


1.0 : स्थानिवत्सूत्रेण अप्रधानकार्यमतिदिश्यते

2.0 : अनुमानिकस्थान्यादेशभावेऽपि प्रवृत्तिः

3.0 : एकदेशविकृतमनन्यवद्


e-Pathshala पाठशाला A Gateway to all Post Graduate Courses

## 1.0 स्थानिवत्सूत्रेण अप्रधानकार्यमतिदिश्यते

**शेखरे - तत्रानपेक्षितार्थसन्निधानः तत्तन्निमित्तरूपकार्यव्यवहार एवानेन। कार्यं तु स्वशास्त्रेणैवेति। अत एव रामायेत्यादौ स्थानिवत्त्वेन सुप्त्वात् सुपि चेति दीर्घः इति सङ्गच्छते। परिवीरित्यादौ परत्वाद् दीर्घ इति च सङ्गच्छते।**

स्थानिवत्सूत्रेण कार्यमतिदिश्यते इत्युक्तम्। तच्च कार्यं सुपिचेत्यादितत्तद्विधिसूत्रविहितं दीर्घादिकार्यमिति न भ्रमितव्यम्। तथाहि - प्रधानकार्यम् अप्रधानकार्यमिति द्विविधं कार्यम्। सुपिचेत्यादिविधिसूत्रेण विधीयमानं दीर्घादि प्रधानकार्यम्। प्रधानकार्यार्थमपेक्षितं सुप्त्वादि निमित्तम् अप्रधानकार्यम्। एवञ्च स्थानिवत्सूत्रेण अप्रधानकार्यमतिदिश्यते। प्रधानकार्यं तु सुपि चेत्यादिना तत्तच्छास्त्रेणैव क्रियते। अनपेक्षितम् अर्थसन्निधानं यस्य सः अनपेक्षितार्थसन्निधानः। तत्तन्निमित्तरूपं कार्यं, तस्य व्यवहारः। यथा राम य इति स्थिते य इत्यस्मिन्नादेशे सुप् इति व्यवहारः। तदर्थं ङेप्रत्ययस्य सन्निधानं नापेक्ष्यते। ङेप्रत्ययस्य सन्निधानं विनैव तन्निष्ठसुप्त्वव्यवहारः यादेशे स्थानिवत्सूत्रेण क्रियते। सुबिति व्यवहारे च यादेशे स्थानिवद्भावेन लब्धे अकारान्तस्याङ्गस्य दीर्घरूपं प्रधानकार्यं तु सुपिच इत्यनेनैव। भाष्यकृता च (स्थानिवत्त्वेन सुप्त्वम्, सुपि चेति दीर्घः) इति कथयता विकलनिमित्तरूपम् अप्रधानकार्यमेव स्थानिवत्सूत्रेण, प्रधानकार्यं तु सुपिचेत्यादिना तत्तत्सूत्रेणैवेति बोधितम्। परिपूर्वकात् व्येञ्धातोः क्विपि परिव्ये क्विप् इति स्थिते वचिस्वपियजादीनां किति इति सूत्रेण सम्प्रसारणे पूर्वरूपे परिवि क्विप् इति जाते ह्रस्वस्य पिति कृति तुक् इत्यनेन तुगागमः प्राप्नोति, हलः इति सूत्रेण दीर्घोऽपि। तत्र विप्रतिषेधे परं कार्यमिति न्यायेन परत्वात् हल इति दीर्घः - इति भाष्यादावुच्यते। तथा च परिवीः इति रूपं सिध्यति। यदि प्रधानकार्यमपि

स्थानिवत्सूत्रेणैव क्रियते तर्हि तुगागमदीर्घयोरुभयोरपि प्रधानकार्यत्वात् एकेनैव सूत्रेण (स्थानिवत्सूत्रेण) कर्तव्यत्वे पूर्वं परमित्यस्याभावे, परत्वात् दीर्घत्वमिति परिहारः असङ्गतः स्यात्। तस्मात् प्रधानकार्यं तत्तद्विधिसूत्रेणैव कर्तव्यं, तदर्थमावश्यकानां निमित्तानाम् (अप्रधानकार्याणाम्) सम्पादनमेव तु स्थानिवत्सूत्रेण कर्तव्यम्। अप्रधानमित्यस्य अङ्गभूतमित्यर्थः।

**शेखरे - यद्वा किञ्चिन्निमित्तवैकल्येपि दीर्घादि कार्यमनेन क्रियते। तच्च कार्यं किम् इत्याकाङ्क्षायां तत्स्वरूपनिर्णयस्य विधिशास्त्रमूलकत्वेन तद्देशेनैव परशास्त्रविहितत्वरूपं परत्वं तेषां बोध्यम्। एतदेवाभिप्रेत्य अतिदिश्यमानकार्याणामुपदेशदेश एव देश इत्यभियुक्ताः।**

यदि प्रधानकार्यमपि स्थानिवत्सूत्रेणैव कर्तव्यमिति लाघवानुरोधेन आग्रहः तर्हि एवं समर्थनीयम् - यदा लक्ष्ये किञ्चिन्निमित्तवैकल्यवशात् सुपिचेत्यादिशास्त्रस्य अप्रवृत्तिः सम्भवति तत्र स्थानिवत्सूत्रमेव सुपिचेत्यादिसूत्रेण विधातव्यं कार्यं सामान्यतो विधत्ते। तत्तल्लक्ष्ये कार्यविशेषजिज्ञासायां सुपि चेत्यादिना सूत्रेण केवलं तत्तत्कार्यस्वरूपमात्रम् उपदिश्यते। यथा - राम य इति स्थिते यादेशे सुप्स्वरूपनिमित्तवैकल्यात् सुपिचेत्यस्याप्रवृत्तौ तादृशनिमित्तस्य वैकल्येऽपि (अदन्ताङ्गस्य यञादौ सुपि परे यत् प्राप्नोति कार्यं तत् स्यात्) इत्येवं कार्यं कार्यत्वेन रूपेण विधत्ते स्थानिवत्सूत्रम्। तस्य कार्यस्य स्वरूपनिर्णयाय सुपि चेति सूत्रस्योपयोगः। तथा - परि वि क्विप् इति स्थिते क्विपः इकारपकारककाराणाम् इत्संज्ञया लोपे वकारस्य वेरपृक्तस्येति लोपे (परि वि) इति जाते लोपादेशस्य प्रत्ययत्वपित्त्वकित्वकृत्त्वानामभावात् तन्निमित्तकदीर्घतुक्शास्त्रयोरप्रवृत्तौ तेषां निमित्तानामभावेपि (ह्रस्वस्य पिति कृति यत् कार्यं तत् स्यात्) इति, (अङ्गावयवाद्

हलः परं यत् सम्प्रसारणं तदन्तस्य अङ्गस्याचो यत् कार्यं तत् स्यात्) इति च विधीयते स्थानिवत्सूत्रेण। तस्य तस्य कार्यस्य स्वरूपं किमिति निर्णयाय तु (ह्रस्वस्य पिति कृति तुक्), (हलः) इति सूत्रद्वयं प्रति गम्यते। तत्र कार्यस्वरूपनिर्णायकयोः सूत्रयोः पूर्वत्वपरत्वाधारेण विप्रतिषेधसूत्रप्रवृत्तिः। तथा च – अभियुक्तोक्तिः - अतिदिश्यमानकार्याणाम् उपदेशदेश एव देशः - इति।

**शेखरे - अत्र आद्यपक्ष एव भाष्यसम्मतः। अत एव स्थान्यल्विधिप्रतिषेधे कुरुवधपिबां प्रतिषेधो वक्तव्य इत्येतदुपपादनावसरे (स्थानिवद्भावादङ्गसंज्ञा, स्वाश्रयञ्च लघूपधत्वादि, तत्र लघूपधगुणादिः प्राप्नोति) इत्यादिभाष्योक्तिरिति बोध्यम्।**

अप्रधानकार्यातिदेशपक्षः प्रधानकार्यातिदेशपक्षश्च उपपादितः। तयोः कतरः पक्षो भाष्यसम्मत इति जिज्ञासायामुच्यते- अत्र आद्यपक्ष इत्यादि। पूर्वोक्तयोः पक्षयोः आद्यपक्षं - (विकलनिमित्तरूपम् अप्रधानकार्यमेव स्थानिवत्सूत्रेण सम्पाद्यते, प्रधानकार्यं तु तत्तत्सूत्रेणैव क्रियते) इति पक्षम् - अवलम्ब्यैव भाष्यकारस्य व्यवहारो दृष्टः। तथाहि स्थानिवत्सूत्रे - आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः) इति वार्तिकमुपपादयता भाष्यकृता (...स्थानिवद्भावादङ्गसंज्ञा, स्वाश्रयञ्च लघूपधत्वं, तत्र लघूपधगुणत्वादि प्राप्नोति..) इत्यदि कथितम्। पुगन्तलघूपधस्य च इति सूत्रस्य प्रवृत्त्यर्थमपेक्षितम् अङ्गसंज्ञारूपं निमित्तं स्थानिवत्सूत्रेण सम्पाद्यते, लघूपधगुणस्तु तेनैव सूत्रेण भवति - इति ततः स्पष्टमवगम्यते।

**शेखरे - एवं यन्निमित्तवैकल्यप्रयुक्ता उपदेशाप्रवृत्तिः तन्निमित्तातिरिक्त-सर्वनिमित्तकत्वम् अतिदेशस्यापि।**

अप्रधानकार्यातिदेशपक्षापेक्षया प्रधानकार्यातिदेशपक्षे लाघवमित्युक्तम्। तथाहि अप्रधानकार्यातिदेशपक्षे स्थानिवत्सूत्रेण अप्रधानकार्याणि, सुपिचेत्यादिना तत्तत्सूत्रेण

प्रधानकार्याणि इति गौरवम्। प्रधानकार्यमपि स्थानिवत्सूत्रेणैवेति स्वीकारे तु एकेनैव उभयमिति लाघवम्। परन्तु तथा लाघवं वक्तुं न शक्यते इति दर्शयति- एवमित्यादिना। (एवम्...अपि) - यथा प्रधानकार्यातिदेशपक्षे भाष्यसम्मतिः नास्ति, एवं लाघवाभावोपि। प्रधानकार्यातिदेशपक्षे, सुपिचेत्यादिसूत्रप्रवृत्त्यर्थमावश्यकेषु निमित्तेषु यस्यकस्यचित् निमित्तस्य वैकल्ये, सुपिचेत्यादेरप्रवृत्तौ स्थानिवत्सूत्रमेव किञ्चिन्निमित्तवैकल्येपि कार्यं विधत्ते -इत्युक्तम्। तर्हि, राम ङस् इति स्थिते टाङसिङसामिनात्स्या इत्यनेन स्यादेशे राम स्य इति जाते सुप्त्वयञादित्वयोः वैकल्यात् सुपिचेत्यस्याप्रवृत्तौ तेन विधातव्यं कार्यं स्थानिवत्सूत्रेण कुतो न क्रियते इति पृच्छामि। तत्र त्वया वक्तव्यं - यस्मिन् आदेशे यावतां धर्माणां सद्भावे एव शास्त्रं प्रवर्तते तेषु धर्मेषु विकलस्य धर्मस्यातिदेशार्थं स्थानिवत्सूत्रापेक्षा, यस्मिँस्तु सर्वेषामपि धर्माणामभावः तत्र शास्त्राप्रवृत्तिरेव, न तु तत्र अतिदेशः प्रार्थ्यते। उपलभ्यमानाः धर्माः अनुपलभ्यमानधर्मातिदेशं प्रति निमित्तमिति यावत्। किञ्चिन्निमित्तोपलब्धिरेव स्थानिवत्सूत्रप्रवृत्तिं प्रति निमित्तमिति स्वीकार्यम् - इति। तथासति राम स्य इत्यत्र स्थानिवत्सूत्रं यत्किञ्चिन्निमित्तानुपलम्भात् न प्रवर्तते। एवं स्वीकारे, उभयोः पक्षयोः लाघवं गौरवं वा तुल्यमेवाभूत्। तथाहि - प्रधानकार्यातिदेशपक्षे सुपि चेत्यादिशास्त्रस्य यावन्ति निमित्तानि तेषु विकलनिमित्तातिरिक्तानि निमित्तानि स्थानिवत्सूत्रप्रवृत्तौ निमित्तानि, कार्यविशेषस्वरूपनिर्णयार्थं सुपिचेत्यादिशास्त्रमपि आवश्यकम्। अप्रधानकार्यातिदेशपक्षेपि विकलनिमित्तस्यातिदेशार्थं तदतिरिक्तनिमित्तानि निमित्तानि, सुपिचेत्यादिशास्त्रावश्यकता च। एवञ्च उभयोः तुल्यतैव। परन्तु तुल्यत्वेपि भाष्यसम्मतत्वात्तु अप्रधानकार्यातिदेशपक्षः श्रेयान्।

शेखरे - अत एव इष्ठवद्भावेन अतिदिष्टभत्वस्य वर्णाश्रयत्वमित्यादिव्यवहारः। सर्वातिदेशेष्विदं तुल्यम्।

पटुमाचष्टे इत्याद्यर्थे पटु इत्यादिप्रातिपदिकात् (प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च) इति गणसूत्रेण णिचि, तस्य इष्ठवद्भावे च, पटु णिच् इति स्थिते, टेः इति सूत्रेण उकारलोपे, पट् इ इति जाते तिपि शपि पटयति इति। पटि इत्यस्माद् ण्यन्तात् धातोः क्विपि णेरनिटि इति णिलोपे, क्विपः सर्वस्य लोपे च, पट् इति। तस्मात् प्रातिपदिकात् भ्यामादौ पट् भ्याम् इत्येवं स्थिते झलां जशोऽन्ते इति जश्त्वे पड्भ्याम् इत्यदि सिध्यति। अत्र प्रत्ययलक्षणेन णिपरकत्वे सति इष्ठवद्भावेन पट् इत्यस्य भसंज्ञायां पदत्वाभावात् कथं जश्त्वमिति चेत् - यचि भम् इति भसंज्ञाविधानस्य वर्णाश्रयत्वात् वर्णाश्रये नास्ति प्रत्ययलक्षणम् इति परिभाषया प्रत्ययलक्षणाभावात् भ्यामादिनिमित्तकपदसंज्ञायां सत्यां जश्त्वं निर्बाधम् - इत्यादिविचारो मनोरमादौ वर्तते।

अत्र (इष्ठवच्च) इत्यनेन भसंज्ञार्थनिमित्तमात्रं सम्पाद्यते, भसंज्ञारूपं प्रधानकार्यं तु यचि भम् इत्यनेनैव -इति स्वीक्रियते वा उत, भसंज्ञारूपं प्रधानकार्यमपि (इष्ठवच्च) इत्यनेनैव क्रियते -इति स्वीक्रियते वा इति विचारः। यदि प्रधानकार्यमपि इष्ठवच्च इत्यनेनैव क्रियत इति स्वीक्रियेत तर्हि भसंज्ञाया वर्णाश्रयत्वाभावात् वर्णाश्रये नास्ति प्रत्ययलक्षणमित्यस्यापि अभावात् प्रत्ययलक्षणे सति भसंज्ञायां जश्त्वं न सिध्येत्।

ननु इष्ठवच्च इत्यत्र प्रधानकार्यातिदेशपक्षे दोषसद्भावः स्थानिवत्सूत्रे तदनाश्रयणे हेतुः कथं स्यात् -इति चेत् उच्यते- सर्वातिदेशेष्विदं तुल्यमिति। शास्त्रातिदेशकार्यातिदेश अप्रधानकार्यातिदेशविषये विचारं कृत्वा अप्रधानकार्यमेव अतिदिश्यत इति निर्णये आश्रिताः युक्तयः सर्वेष्वतिदेशेषु तुल्याः।

**शेखरे - यन्निमित्तवैकल्यप्रयुक्ता उपदेशाप्रवृत्तिः तत् निमित्तं शास्त्रीयमेव, प्रत्यासत्तेः।**

तस्मिन् तस्मिन् शास्त्रे तत्प्रवृत्त्यर्थं यत् यत् निमित्तमुक्तं तत् शास्त्रीयम्। शास्त्रीयस्य निमित्तस्य वैकल्ये सति स्थानिवद्भावादिना विकलं तदेव अतिदिश्यते। यथा (आर्धधातुकस्येड् वलादेः) इति शास्त्रस्य प्रवृत्त्यर्थं वलादित्वम् आर्धधातुकत्वञ्च निमित्ततया निर्दिष्टम्। यत्सत्त्वे यत् कार्यं भवतीति यस्मिन् शास्त्रे उच्यते तदभावे तेन शास्त्रेण तत् कार्यं नोपस्थाप्यते। ततश्च तत्तच्छास्त्रोक्तं तत्तच्छास्त्रोक्तकार्य-निरूपितमेव निमित्तत्वम्। अशास्त्रीयस्य निमित्तत्वस्यैवाभावात् अस्य ग्रन्थस्य उपस्थितिरेव वस्तुतः नास्ति।

प्रत्ययसंज्ञा सुप्संज्ञा आर्धधातुकसंज्ञा इत्यादयो ये धर्माः अनुशासनेन स्थानिना लब्धाः तेषामिह शास्त्रीयनिमित्तपदेन विवक्षितत्वमिति स्वीकृत्यापि ग्रन्थोऽयं व्याख्यातो बहुभिः। तस्मिन्नपि व्याख्याने वलादित्वादिरूपनिमित्तस्य अशास्त्रीयत्वात् अतिदेशाभावे प्रदीव्येत्यादाविट् न इति स्वग्रन्थानुत्थितिः।

2.0 अनुमानिकस्थान्यादेशभावेपि प्रवृत्तिः

**शेखरे - स्थानिवदित्युक्तेः सम्बन्धिशब्दमहिम्नैव आदेशलाभे आदेशग्रहणं श्रौतस्थान्यादेशभावस्यैव ग्रहणमिति शङ्कावारणद्वारा एरुः इत्यादौ शब्दानित्यत्ववारणाय सर्वे सर्वपदादेशाः इति न्यायेन कल्प्यमानस्य तेस्तुरित्यानु-मानिकादेशस्यापि सङ्ग्रहार्थम्। तेन पचत्वित्यादेः पदत्वसिद्धिरिति भाष्ये स्पष्टम्।**

सूत्रे आदेशपदं किमर्थमिति प्रश्नः। (स्थानिवद् अनल्विधौ) इत्येव सूत्रं कर्तव्यम्। कः स्थानिवत् स्यात् इति जिज्ञासायाम् सम्बन्धिशब्दमहिम्ना आदेश इति लभ्यते। यथा गुरुमवन्दत इत्युक्ते शिष्य इति स्वत एव लभ्यते तथा। अत्र समाधानम् - स्थान्यादेशभावः द्विविधः - श्रौतः आनुमानिक इति। यथा -

अस्तेर्भूः इति सूत्रेण अस्तेः स्थाने भ्वादेशो विहितः, तत्र अस्तेः स्थानित्वं, भुव आदेशत्वं च सूत्रे एव श्रूयते। तस्मादयं अस्तिभुवोः स्थान्यादेशभावः श्रौतः। एरुः इति सूत्रेण लोट इकारस्य स्थाने उकारो भवतीति विधीयते। तथा च तत्र इकार-उकारयोः स्थान्यादेशभावः श्रौतः। किन्तु लोट इकारस्य उकारे कृते तिप्रत्ययस्य तु इत्यादेशः कृत इति फलति। तथा च ति-तु अनयोः स्थान्यादेशभावः आनुमानिकः, अनुमितः।

सूत्रे आदेशग्रहणाभावे, स्थानिवत् स्यादित्युक्ते कः स्थानिवत् स्यात् इति जिज्ञासायां श्रौतानुमानिकयोः आदेशयोः श्रौत एव सम्बध्येत, श्रुतानुमितयोः श्रुतसम्बन्धस्य बलीयस्त्वात्। तथा च श्रौतस्थान्यादेशभावस्थले एव सूत्रप्रवृत्तिः स्यात्। पच् लोट् इति स्थिते तिपि शपि, एरुः इति सूत्रेण इकारस्योकारादेशे पच् अ तु इति जाते, तु इत्यस्य तिङ्त्वाभावात् सुप्तिङन्तं पदमिति पदसंज्ञा पचतु इत्यस्य न सिध्येत्। ति-तु अनयोः श्रौतः स्थान्यादेशभावो नास्तीति कृत्वा स्थानिवत्सूत्रञ्च न प्रवर्तिष्यते। अतः ईदृशे आनुमानिक – स्थान्यादेशभावस्थलेऽपि स्थानिवत्सूत्रस्य प्रवृत्तये सूत्रे आदेशग्रहणं कृतम्। तथा च अधिकयत्नस्य अधिकं फलं कल्पनीयमिति कृत्वा सर्वविधः – श्रौतोऽपि आनुमानिकोऽपि- स्थान्यादेशभावो गृह्यते। तथा च पचतु इत्यादौ स्थानिवद्भावेन तु इत्यस्य तिङत्वात् सुप्तिङन्तं पदमिति पदसंज्ञा सुलभा।

### 3.0 एकदेशविकृतमनन्यवद्

**शेखरे - ननु [तोस्तित्वमपि छिन्नपुच्छे शुनि श्वत्वव्यवहारवत् लोकन्यायेनैव सिद्धम्। तदुक्तं प्राग्दीव्यतोऽण् इति सूत्रे भाष्ये दीव्यतिशब्दैकदेशदीव्यच्छब्दानु-करणमिदम् इत्युक्त्वा किमर्थं विकृतनिर्देशः, एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा एकदेशविकृतमनन्यवद् इति।**

(इति चेन्न) इति अग्रे दूरे विद्यते। (ननु) इत्यस्य तत्रान्वयः। एकदेशविकृतमनन्यवदिति कश्चन न्यायोऽस्ति लोके। एकदेशः नाम अवयवः। अवयवस्य अन्यथात्वेपि समुदायस्य अन्यथात्वं न प्रतीयते -अतः तत्र अन्यवत् न व्यवहारो लोके। यथा शुनः पुच्छे छिन्नेपि अश्व इति वा गर्दभ इति वा न व्यवहारः, किन्तु श्वा इत्येव लोके व्यवहारो दृश्यते। एवम्, शास्त्रेऽपि पचतु इत्यादौ ति इत्यत्र इकारस्य विकारेण उकारे कृते तु इत्यत्रापि ति इत्येव व्यवहारः सिध्यति। तथा च आनुमानिकस्य तु इत्यादेरादेशस्य तित्वादिसम्पादनार्थम् आनुमानिकस्थान्यादेश-भावस्थलेऽपि स्थानिवद्भावार्थम् सूत्रे आदेशग्रहणं व्यर्थम्।

एकदेशविकृतमनन्यवदिति लोकन्यायश्च शास्त्रेऽपि आश्रीयते। तथाहि प्राग्दीव्यतोऽण् इति सूत्रे दीव्यतेः इति वक्तव्ये दीव्यतः इति निर्देशः शास्त्रेऽपि तस्य न्यायस्य सत्तां ज्ञापयतीति भाष्ये उक्तम्। तेन दीव्यति खनति जयति जितम् इति सूत्रस्थात् दीव्यति इत्यस्मात् प्राक् अण् प्रत्ययोऽधिक्रियते इत्यांशकं सूत्रं भवति प्राग्दीव्यतोऽण् इति। तत्र दीव्यतिशब्दैकदेशस्य दीव्यत् इत्यस्य पञ्चम्यन्तं दीव्यत इति।

A Gateway to all Post Graduate Courses

**शेखरे - अत एवात्र विकारोऽशास्त्रीयोऽपि। अत एव श्रायसशब्दादण्णन्तात् द्विवचने श्रायसावित्यत्र वृद्धौ कृतायां सान्तस्योगित्त्वेन अनेन न्यायेन अङ्गतया प्राप्तो नुम् पूर्वसम्बन्धिविधित्वेन अचः परस्मिन् इति स्थानिवत्त्वेन वारितः अचः परस्मिन्निति सूत्रे भाष्ये। एतन्न्यायानाश्रयणे तु अङ्गत्वमेव दुर्लभम्।**

एकदेशविकृतमनन्यवदिति न्यायस्य लोकतः सिद्धत्वात्, दीव्यतः इत्येवम् अशास्त्रीयविकारविशिष्टनिर्देशेन ज्ञापितत्वाच्च अशास्त्रीये विकारेऽपि प्रवृत्तिरङ्गीक्रियते। यथा - श्रायसौ इत्यत्र नुमागमः कथं न इति विचारितं भाष्ये। तथाहि - अयमनयोः

अतिशयेन प्रशस्य इत्यर्थे प्रशस्यशब्दात् द्विवचनविभज्योपपदे तरबीयसुनौ इति सूत्रेण ईयसुनि प्रशस्य ईयसुन् इति स्थिते प्रशस्यस्य श्रः इति सूत्रेण श्रादेशे आद्गुण इति गुणे च श्रेयस् इति। अत्र टेः इत्यनेन टिलोपो न भवति, प्रकृत्यैकाच् इति प्रकृतिभावविधानात्। श्रेयसि भव इत्याद्यर्थे ततः अण्प्रत्यये श्रेयस् अण् इति स्थिते देविका-शिंशपा-दित्यवाड्-दीर्घसत्र-श्रेयसामात् इति सूत्रेण आत्त्वे श्रायस् अण्। श्रायस। ततः औप्रत्यये वृद्धिरेचीति वृद्धौ श्रायसौ। अत्र एकादेशस्य औकारस्य परादिवद्भावेन औप्रत्ययत्वे ततः पूर्वभागस्य श्रायस् इति सकारान्तस्य उगिदचां सर्वनामस्थानेधातोः इति सूत्रेण नुमागमः प्राप्नोतीति आशङ्कितं भाष्ये। उगिदचामित्यनेन अङ्गस्य नुमागम उच्यते, कथं श्रायस् इत्यस्य अङ्गसंज्ञा कथम् उगित्त्वम्। श्रेयस् इत्यस्य उगित्त्वं,श्रायस इत्यस्य अङ्गत्वं च श्रायस् इत्यत्र एकदेशविकृतमनन्यवदिति न्यायेन सम्पाद्य आशङ्का कृता भाष्ये। श्रेयस् इत्यत्र एकारस्य आकारः शास्त्रीयः, देविकाशिंशपेत्यादिशास्त्रेण आत्त्वविधानात्। श्रायस इत्यकारान्तस्य सकारान्तत्वम् अशास्त्रीयम्। श्रायसशब्दस्य श्रायस् आदेशः स्यादिति केनाप्यविधानात्। श्रायस् औ इति स्थिते प्राप्तस्य नुमः वारणं तु अचः परस्मिन् पूर्वविधावित्यनेन साधितम्। परनिमित्तकः अजादेशः प्रकृते एकादेशः, स्थानिवत् स्यात् - अऔ इत्येवं स्यात् पूर्वविधौ कर्तव्ये श्रायस् इत्यत्र नुमागमे कर्तव्ये - इत्येवम्।

**शेखरे - अन्तादिवत्सूत्रे भाष्यकैयटयोरपि गुडोदकमित्यादावेकादेशे कृते दकशब्दस्यानेन न्यायेन उदकशब्दत्वमाश्रित्य उदकेकेवले इति पूर्वपदान्तोदात्तत्वमुक्तम्।**

गुड उदकमिति स्थिते आद्गुण इति गुणे एकादेशे गुड् ओ दकम् इति। इदानीं गुडो इति पूर्वपदं दकमिति च उत्तरपदम्। अत्र उदकेकेवले इति सूत्रेण अकेवलवाचिनि

समासे, उदकशब्दे उत्तरपदे पूर्वपदस्य विहितः अन्तोदात्तस्वरः इष्यते। अत्र एकादेशे कृते दकशब्द उत्तरपदं, न तु उदकशब्द इति स स्वरो न सिध्येत्। दकशब्दस्य एकदेशविकृतन्यायेनोदकशब्दत्वमाश्रित्य स्वरः सम्पादितो भाष्यादौ। एतदपि अशास्त्रीये विकारे एकदेशविकृतन्यायसञ्चारं प्रति प्रमाणम्।

**शेखरे - शब्दानित्यत्वं तु रेखागवयन्यायेन समाधेयम्।**

शब्दो नित्य इति वादे एकदेशविकार इति न युज्यते। तदुक्तम् - सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः एकदेशविकरे हि नित्यत्वं नोपपद्यते इति। तथाच कथम् एकदेश विकृतमनन्यवदित्यादि सङ्गच्छते इति प्रश्नः। अत्र समाधानम्- गवादीनां चित्रं यथा लिख्यते तथा शब्दानां प्रक्रिया प्रदर्श्यते। लाङ्गूले लिख्यमाने वस्तुतः गवि लाङ्गूलस्य यथा नोत्पत्तिः, लिखितस्य चित्रस्य मार्जने वा वस्तुतः गोः न नाशः एवं प्रक्रियासोपानेषु विकारागमादिकल्पनेऽपि वास्तविकस्य नित्यस्य शब्दस्य विकारादिकं नास्ति।

**शेखरे - अनन्यवदित्यस्य अन्यवद् न इत्यर्थः। तत्र अन्यसादृश्यनिषेधे अन्यत्वाभावः सुतराम्।**

एकदेशविकृतमनन्यवदित्यत्र अनन्यवदित्यस्य कोऽर्थः। न अन्यः अनन्यः स्वस्मादभिन्न इत्यर्थः, तथासति स्ववदित्यर्थे स्वस्य स्ववद्भाव इति कथनमसङ्गतं निरर्थकञ्च। तस्मात् अन्येन तुल्यं वर्तते इत्यन्यवद्, न अन्यवद् अनन्यवद् इत्यर्थः। तत्र अन्यसादृश्यनिषेधे अन्यत्वाभावः फलति।

**शेखरे - इति चेन्न। अर्धस्यान्यत्वे जातिव्यञ्जकभूयोवयवदर्शनाभावेन तौ तित्वप्रतीतेः न्यायेनानुपपादनात्।**

आनुमानिकस्थान्यादेशस्थलेऽपि स्थानिवत्सूत्रप्रवृत्त्यर्थम् आदेशग्रहणमित्युक्तम्। तत्र एकदेशविकृतन्यायेनैव पचतु इत्यादौ सिद्ध्यति खलु इत्यादिपूर्वपक्ष आरब्धः

ननु इति। तस्य पूर्वपक्षस्य इति चेन्न इत्यत्र समाप्तिः। अथ उत्तरपक्षं रचयति- अर्धस्येत्यादिना। तिप्रत्यये एरुरिति सूत्रेण इकारस्य उकारे कृते एकदेशविकृतन्यायः प्रवर्तयितुं न शक्यते। तथाहि तिप्रत्यये द्वौ वर्णौ तकार इकारश्च, तत्र इकारस्य विकारे सति अर्धभागस्य तदधिकभागस्यैव वा विकारः जायते। तदा जातिव्यञ्जकभूयोऽवयवदर्शनं न भविष्यति। यथा शुनः पुच्छे छिन्नेऽपि श्वत्वजातेरभिव्यञ्जकाः भूयांसः अवयवाः तस्मिन् विद्यन्त इति कृत्वा अयं श्वा इति प्रतीयते न तथा तिप्रत्यये। तिप्रत्यये हि इकारे विकृते तित्वजातेः अभिव्यक्तये पर्याप्ताः अवयवा न सन्तीति कृत्वा तिप्रत्ययोऽयमिति प्रतीतिः नैव भवेत्।

**शेखरे - तिङ्संज्ञायाः..।**

तिङ्संज्ञा तिबादिसूत्रोपात्तपरिच्छिन्नपरिमाणनिष्ठा। न्यूनेऽधिके वा परिच्छिन्नपरिमाणार्थवाचकशब्दानां शास्त्रव्यापारं विना न प्रवृत्तिः। न्यूनाधिकत्वं वैरूप्यस्योपलक्षणम्। अतः ति-तु इत्यत्र न्यूनाधिकत्वाभावेऽपि एकदेशविकृतन्यायेन पूर्वपक्ष उपपन्नः।

A Gateway to all Post Graduate Courses